# Shri Vinayaka Stotram

# श्रीविनायकस्तोत्रम्

## Document Information

Text title : vinAyakastotram 3

File name : vinAyakastotram3.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 01-05

Latest update : February 13, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 13, 2021

*sanskritdocuments.org*

Shri Vinayaka Stotram

# श्रीविनायकस्तोत्रम्

गण्डस्थलद्ध्वरागलन्मदवारिधारा
सौरभ्यलुभ्यदलिडिम्भकगुम्भनादैः ।
वाचालिताखिलदिशं वरदं नतानां
वन्दामहे गजमुखं वयमादिदेवम् ॥ १॥

गर्विष्ठखेचरपुरत्रयनाथदैत्य-
भङ्गोद्यतः स्वयमयं परमेश्वरोऽपि ।
आदौ यमेव परिपूज्य विधूतसर्व-
विघ्नो जिगाय तमिमं वयमाश्रयामः ॥ २॥

प्रणष्टवर्णततिपञ्चमषष्ठवर्ण-
युग्माविधेयविरहादतिमात्रदीनम् ।
प्रायेत मामनुदिनं निजपुष्करात्त-
कुम्भस्थरत्ननिकरानभिवृध्य देवः ॥ ३॥

पद्मासहायगिरिजापतिरत्यवागधीश-
देवादिनाकनिलयैर्वनितासहायैः ।
अन्वास्यमानमखिलास्वपि दिक्षु सिद्ध -
लक्ष्मीसहायमनिशं शरणं भजामः ॥ ४॥

तन्वीत नः शुभमतिं तरुणारुणश्री
दायादकायरुचिरिन्दुकृत्तंससूनुः ।
प्रत्यूहभङ्गपटुभिः सहितो वधूभि
रामोदमुख्यनिजपारिषदैः समेतः ॥ ५॥

ये चिन्तयन्ति निमिषार्धमपि प्रभो त्वां-
श्रीमानिभानन विधूतभिदान्धकाराः ।
बाभासमानमनिशं हृदये समुद्य-
दानन्दबोधघनमेकममी नमस्याः ॥ ६॥

न श्रौतकर्मसु रतिर्न च बोधनिष्ठा
स्वामिन्नुमासुत न जातु कृतापि पूजा ।
निस्सारवैषयिकसौख्यदुराशयैव
नीतान्यहान्यहह किं कथये दयस्व ॥ ७॥

वस्त्राज्यदुग्धमधुभिः सितशर्कराद्यैः
पुण्ड्रेक्षुखण्डकदलीफलनारिकेलैः ।
लाजैश्च मोदकयुतैः परिपूजितुं त्वां (लाभैश्च)
धन्याः क्षमाः परमहं शरणं प्रपद्ये ॥ ८॥

समीरैः प्रोच्चण्डैः श्रवणयुगलीचालनभवै-
र्नतानां प्रत्यूहच्छलजलदराशिं विदलयन् ।
कटायोगोदश्चन्मदसुरभिलादोषभुवनः
शिवाचन्द्रोत्सप्रणयपरिणामोऽवतु गजः ॥ ९॥

॥ इति श्रीविनायकस्तोत्रं सम्पूर्णम् ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Vinayaka Stotram*

pdf was typeset on February 13, 2021

Please send corrections to *sanskrit@cheerful.com*